Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:14, Issue:10(4), October, 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed : Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

# मुद्राराक्षसनाटकम् - कौटिल्यार्थशास्त्रस्य लक्ष्यम्

Dr. M. Suresh
Cell: 9000500502

**प्रस्तावना -**

धर्मार्थकाममोक्षः चत्वारः पुरुषार्थाः जीवनसाफल्यसम्पादकाः । तेषु प्रथमे त्रयः लौकिक - जीवनोपयोगिनः । विशेषतः धर्मार्थौ सर्वेषामुपकारकौ । तेष्वपि अर्थः धर्मरहितैः अपि अपेक्षितः एवं चतुर्वर्गे अर्थः सर्वेषां जीवनयात्रायै उपकारको भवति । किन्तु धर्मेण विना अर्थसम्पादनं लोकोपद्रव कारणं भवतीति तन्नियामकमर्भशस्त्रं महात्मभिः अङ्गीकृतम् ।

**अर्थशास्त्रशब्दार्थः** - मनुष्याणां वृत्तिः अर्थः । मनुष्यवती भूमिः इत्यर्थः । तस्याः लाभपालनोपायः यस्मिन् शास्त्रे दृष्टः तदर्थशास्त्रम् । ..........(A)

अर्थशास्त्रस्य विषयाः लौकिकवाङ्मये श्रामद्रामायणे, महाभारते इतरेषु पुराणेषु च बहुधा वर्णिताः तान् विषयान् एकीकृत्य संक्षिप्य सारभूतमर्थं कौटिल्यापर नामकः चाणक्यः अर्थशास्त्रमिति नाम्ना ग्रन्थरूपेण निबद्धवान् । अनन्तरं कामन्दकनीतिसारादयः बहवो ग्रन्याः अर्थशास्त्रविषयकाः बहुभिः रचिताः आपि आस्मिन् विषये कौटिल्यम् अर्थशास्त्रमेव प्रामाणिकं गृह्यते । विष्णुगुप्तः इति चाणक्यस्य प्रथमं नाम ततः गौत्रनाम्ना चाणक्यः शास्त्रोपदिष्ट विषयहेतोः कौटिल्यः इति च व्यवहृतः । अस्मिन् ग्रन्थे पञ्चदशाधिकरणानि 150 अध्यायाः च वर्तन्ते ।

राजनीतिरिति अर्थशास्त्रस्य नामान्तरम् । महाकाव्येषु रूपकेषु च राजनीतेः प्रस्तावः बहुषु दृश्यते तथापि कौटिल्यार्थशास्त्रस्य समग्रं लक्ष्यं विशाखदत्त रचितं मुद्राराक्षसमेव सार्वभौमम् । चाणक्यः अलग्जाण्डर् समकालिकः इति आचार्म पुल्लेल श्रीरामचन्द्रुडु अभिप्रेयाय । ततः अयः बि.सि.400 कालिकः । विशाखदत्तोपि बि.सि.200 प्रान्ते आसीदिति वाङ्मय चरित्रकाराणां मतम् ।..........(B)

**विषयचयनम् :-** मौर्य चन्द्रगुप्तः महापद्मनन्दस्य शूद्रायां मुरायां जातः पुत्रः पित्रा उपेक्षितः । चाणक्यः विद्वान् महापद्मानन्देन पराभूतः नन्दान् नाशयित्वा चन्द्रगुप्तं चक्रवर्तिनं करोमि इति प्रतिजज्ञे । नन्द नाशानन्तरं चन्द्रगुप्तं मगधराज्ये स्थापयित्वा पुनः राज्यं विशालं कृतवान् । सप्ताङ्कमितस्य नाटकस्य मूलभूतम् इयदेव इति वृत्तम् ।

---

A. अर्थशस्त्रम् - 15.1 सूत्रम् - पे.जि. - नें. 888

B. अर्थशास्त्रम् - प्रस्तावना - पे.जि. - नें. 28 आचार्य पुल्लेल श्रीरामचन्द्रः

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:14, Issue:10(4), October, 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed : Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

मुद्राराक्षमनाटके राज्यपालने अपेक्षिता शासनव्यवस्था, सप्ताङ्गानि गूढचर्यं, सान्धिविग्रहादि षाड्गुण्यम् कौटिल्यार्थशास्त्रानुरूपमेव वर्णितमिति निरूपणं पत्रस्यास्य मुख्योविषयः ।

## A) सप्ताङ्गानि

राज्यस्य स्थितिहेतूनि सप्ताङ्गानि अर्थशास्त्रे यथावर्णितानि तदनुकूलानि लक्ष्याण्येव मुद्राराक्षसे निरूपितानि । ..........(A)

''स्वाम्यमात्यजनपददुर्गकोशदण्डमित्राणि प्रकृतयः''

1) स्वामी = राजा
2) अमात्यः = मन्त्री
3) जनपदम् = देशः
4) दुर्गः = आपत्कालो आश्रयणीयः प्रदेशः
5) कोशः = धनसम्पत्तिः
6) दण्डः = शिक्षा स्मृतिः सैन्यं च
7) मित्राणि = सुहृदः एताः सप्तप्रकृतयः सर्वथा राज्यरक्षाहेतवः । एतेषां अर्थशास्त्रोक्तस्य लक्षणस्य मुद्राराक्षसे लक्ष्यं बहुधा दृश्यते । तेषां क्रमेण लक्ष्यलक्षणनिरूपणं क्रियते ।

1) स्वामी - वृद्धदर्शी, धार्मिकः, महोत्साहः, विनयकामः स्वामी भतेत् । इतराण्यपि बहूनि लक्षणानि अर्थशास्त्रे निरुपितानि । मुद्राराक्षसे चन्द्रगुप्तः एवं विधैः गुणैरेव विभूषितो वर्णितः ।

प्रतिनायकात् मलयकेतोरपि चन्द्रगुप्तः सर्वथा गुणोत्तरः प्रशंसनीयः चेति शत्रुः राक्षसमन्त्री एव चन्द्रगुप्तं बहुधा प्रशशंसा । ..........(B)

बाल एव हि लोकेऽस्मिन् संभावित महोदयः ।
क्रमेणारूढवान् राज्यं यूथैश्वर्यमिवद्विपः ।।

तृतीयाङ्के व्यवहारार्थं चाणक्येन दर्शित - कृतककलहोपि चन्द्रगुप्तः लज्जितो भवति इति वर्णनेन राज्ञः विनायधिक्यमपि दर्शितम् । ..........(C)

आर्याज्ञयेव मम लंधित गौरवस्य
बुद्धिः प्रवेष्टुमिव भूविवरं प्रवृत्ता ।
ये सत्यमेव हि गुरुनतिपातयन्ति
तेषां कथं नु हृदयं न भिनत्रि लज्जा ।।

---

A. अर्थशास्त्रम् - षष्ठाधिकरणे - प्रथमाध्याये - ९ सूत्रम् - पे.जि. 531
B. मुद्राराक्षसम् - सप्तमाङ्के - 12 श्लोकः - पे.जि. 380
C. मुद्राराक्षसम् - तृतीयाङ्के - 33 श्लोकः - पे.जि. 206

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:14, Issue:10(4), October, 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed : Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

2) **अमात्यः**

मन्त्री अमात्यःइति तुल्यार्थकौ मुद्राराक्षसे अर्थशास्त्रे च दृष्टौ विशेषतः यः पञ्चाङ्गो मन्त्रः इति अर्थशास्त्रे निरूपितः ताः एव पंक्तयः मुद्राराक्षसेऽपि अनूदिताः द्दश्यन्ते । ..........(A)

कर्मणाम् आरम्भोपायः पुरूषद्रव्यसंपत्, देशकाल विभागः विनिपातप्रतीकारः कार्यसिद्धिः, इति पञ्चाङ्गो मन्त्रः ।

पञ्चाङ्गे मन्त्रे प्रत्यवयवं विस्तरः मुद्राराक्षसे वर्णितः । चाणक्यस्य कर्मणामारम्भोपायः प्रथमाङ्के, तृतीयाङ्के च बहुधा वर्णितः । तन्मयाप्यस्मिन वस्तुनि .... इत्यादिषु बहुधा विवृतश्च । तर्त्रेव जीवसिद्धिसिद्धार्थकविष्णुशर्मादि पुरुषद्रव्यसम्पदप्युक्ता । मलयकेतोः प्रस्थानसमये लेखप्रकाशनं देशकालविभागस्य उदाहरणम् पञ्चमाङ्के द्रष्टव्यम् । विनिपातप्रकारश्च चन्द्रगुप्तरक्षणे चाणक्येन बहुधा कृतः । एष विषयः विराधगुप्तवाक्येषु बहुधा द्वितीयाङ्के विस्तरेण वर्णितः । दाकवर्मणो वधः, बर्बरकवधः, रसदायिनः वैद्यवधः, पिपीलिकपङ्क्त्या अनुमीय पुरुषगर्भगृहदाहः इत्यादि विषयाः विनिपात प्रतीकारस्यैव उदाहरणानि ।

3) **जनपदः** - जनपदस्य सम्पत् तु यद्यपि विस्तरेण न वर्णिता तथापि प्रथमाङ्के चाणक्यचन्दनदासयोः सम्भाषणे जनपदं सुखितमेवेति स्पष्टं भवति ।

4) **दुर्गः** - दुर्गस्यापि वर्णनं नाटके न दृश्यते तथापि प्राकारं परितः शरासनधरैः ..........(B)

इति श्लोके दुर्गवर्जनं द्रष्टव्यम् ।

5) **कोशः** - कोशस्य वृद्धिः राज्ञा कृता युक्तकरग्रहणेन कार्यम् तत्प्रकारश्च अर्थशास्त्रे विस्तृततरा इति प्रकृतानुपयोगित्वात् नोदाह्रियते । किन्तु युद्धकाले प्रभोः अवसरे वा धनिनः राज्ञे प्रभुत्वं वित्तं अन्यत् वस्तुजातं वा ददतीति प्रथमाङ्के चाणक्यचन्दनदासयोः वृक्तान्तेन गम्यते । राक्षसस्थिति जिज्ञासार्थं चाणक्येनाहूतः चन्दनदासः स्व वाणिज्यां अखण्डितामुक्त्वा किं ते ददानि इति अपृच्छत् । तदा चाणक्यवाक्येषु नन्दाः धनिभ्य यथावसरं वस्तु धनं वा गृह्णन्ति स्म इति स्पष्टम् ।

6) **दण्डः** - अविनीतानां सिक्षणं दण्डः । स च बाह्यशत्रूणां आभ्यन्तराणां च शत्रूणां विषये प्रयोज्यः । स च दण्डः वंशक्रमागतः इत्यादि अनेकविधो भवति । प्रायशः दण्डः सेनया साध्यो भवति । अतः सैन्य लक्षणमेव अर्थशास्त्रे उदाहृतम् । पितृपैतामहः, नित्यो, वश्चः, तुष्टभृतपुत्रदारः, प्रवासेष्वपि सम्पादितः सर्वत्र अप्रतिहतः, दुःखसहः, बहुयुद्धः, सर्वयुद्धः प्रहरण विद्याविशारदः, सहवृद्धिक्षयकत्वात् अद्वैध्यः क्षत्रप्रायः इति दण्डसम्पत् । ..........(C)

---

A. मुद्राराक्षसम् - विनमाधिकारे - पञ्चमाध्याये - पे.जि. 61

B. मुद्राराक्षसम् - द्वितीयाङ्के - 13 श्लोकः - पे.जि. 116

C. अर्थशस्त्रम् - महलयोनि प्रकृति सम्पादकः - पे.जि. 534

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:14, Issue:10(4), October, 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed : Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

मुद्राराक्षसनाटके अमात्यसम्पदा दण्डसम्पत् निष्प्रयोजनी कृता । चन्द्रगुप्तःसप्तमाङ्कान्ते एवमेव निश्चित्य वदति ‘‘विनैव युद्धात् आर्येण पराजितं दुर्जयं रिपुकुलं’’ राजापत्यकारिषु तीव्रो दण्डः प्रयुक्त इव अद्घोपितः । किन्तु चन्दनदासं राक्षसात् पृथक् कर्तुमेव चाणक्यः तथा कारितवान् ।

7) **मित्रम्** - ‘‘मित्राणि कार्यसाधकाः भवन्ति । तेन मित्रेण अमित्रं घातयेत् । पितृर्पेतामहं नित्यं वश्चं अर्द्वेध्यं महत् लधुसमुत्थं चेति मित्रसम्पत् । ..........(A)

प्रायशः मित्राणि द्विधा भावान्ति । सहजः, कुत्रिमः इति । यस्य सम्बन्धः न वैरकारणं सः सहजमित्रम् । यश्च उपकारि सः कुत्रिमं मित्रम् । तयोः कुत्रिमः गरीयान् ।

पितृर्पेतामहं मित्रत्वं मलयकेतुराक्षसयोः पञ्चमाङ्के वर्णितम् । तच्च सहजम् । यतः पर्वतेश्वरः राक्षसस्य मित्रं तत्पुत्रो मलयकेनुरिति राक्षसस्य सहजं मित्रम् । किन्तु भागुरायणकृतभेदेन मलयकेतुः कुत्रिमशत्रुरभूत् । राक्षसचन्दनदासयोः मैत्री पुनः वास्तवमेत्री सम्पदः आस्पदम् । अत एव नित्यं महत् अद्वैध्यं च चाणक्यः प्रथमाङ्के चन्दनदासं राक्षसकुटुम्बसमर्पणर्थं बहुधा लोभयति तर्जयति च । तथापि चन्दनदासः द्वैधीभावं न जगाम । अपि च स्वप्राणाः अपि मित्रकार्येण नष्टाः न आत्मनोदोषेण इति चन्दनदासः परितोषमनुभवति ।

## उपसंहारः

राजस्य सप्ताङ्गानि कौटिल्यमर्थशास्त्रम् अनुसृत्यैव मुद्राराक्षसे वर्णितानि । सन्धिः विग्रहः, यानं, आसनं, द्वैधीभावः, समाश्रयणम् इति राज्यनिर्वहणे परैः व्यवहारे मैत्री सम्पादने प्रयोज्याः षड्गुणाः अपि मुद्राराक्षसे अर्थशास्त्रम् अनुसृत्यैव वर्णिताः । मौर्यान् जेतुं पर्वतेन सन्धिं करोति विग्रहः - यानं च मलयकेतु कृतः पञ्चमाङ्के वर्णितः । एवं षाड्गुण्यमपि अर्थशस्त्रानुसारि चारव्यवस्था भेदोपाय सिद्धये बहुधा चाणक्येन प्रयुक्तम् । एवं मुद्राराक्षसनाटकं पुरातनमपि आधुनिक शासनव्यवस्थार्ये महदुपकारकं दृष्टम् । अद्यपि बलवतः शत्रोः निग्रहाय अन्येन बलवत्तरेण सन्धिकरणं दृष्ट एव । एवं यथावसरं रूपभेदेपि मौलिक राजनीति प्रयोगे प्राचीनार्वाचीनयोः मुदाराक्षमनाटकं मार्गनिर्देशकं भवत्येव ।

## उपयुक्तग्रन्थसूची

1. अर्थशास्त्रम् - (अन्ध्रव्याख्यापेतम्)
आचार्य. पुल्लेल श्रीरामचन्द्रः
श्रीजयलक्ष्मी पब्लिकेषन्स्, हैदराबाद - 1999
2. मुद्राराक्षसनाटकम् (रसाख्वादिनी व्याख्या)
आन्ध्रप्रदेश सह्त्यि अकाडमी
हैदराबाद् - 1977

---

A. अर्थशस्त्रम् - षष्ठाधिकरणे - प्रथमाध्याये - पे.जि. 534